नामांक Roll No.

Sl.No. :

No. of Questions – 20

No. of Printed Pages – 7

VU–87–Sahit. Shas.

# वरिष्ठ उपाध्याय परीक्षा, 2025

# VARISHTHA UPADHYAYA EXAMINATION, 2025

## साहित्य – शास्त्रम्

**समय** : 3 **घण्टे** 15 **मिनिट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्य–निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः समाधेयाः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## <u>खण्डः – ''अ''</u>

1) बहुविकल्पात्मकप्रश्नाः [18×1=18]

i) चन्द्रालोकेऽलकाराः वर्णिताः सन्ति – [1]

अ) तृतीयमयूखे ब) चतुर्थमयूखे

स) पञ्चममयूखे द) षष्ठमयूखे

ii) वाक्ययोरर्थ सामान्येऽलङ्कारो भवति – [1]

अ) दृष्टान्तः ब) व्यतिरेकः

स) प्रतिवस्तूपमा द) आवृत्तिदीपकम्

iii) विभावः कतिविधो भवति – [1]

अ) पञ्चविधः ब) द्विविधः

स) त्रिविधः द) एकविधः

iv) चन्द्रालोकानुसारं रीतयः सन्ति – [1]

अ) सप्त ब) पञ्च

स) तिस्रः द) चतस्रः

v) वक्तृस्यूत–व्यङ्ग्यस्य भेदाः सन्ति – [1]

अ) पञ्च ब) सप्त

स) त्रयः द) चत्वारः

vi) चन्द्रालोके गुणी भूतव्यङ्ग्यकाव्यं वर्णितम् – [1]

अ) नवमे मयूखे ब) दशमे मयूखे

स) अष्टमे मयूखे द) पञ्चमे मयूखे

vii) प्रयोजनभेदेन लक्षणा कतिधा – [1]

अ) एकधा ब) द्विधा

स) त्रिधा द) पञ्चधा

viii) चन्द्रालोकानुसारम् अभिधा वर्तते – [1]

अ) एकविधा　　ब) द्विविधा

स) त्रिविधा　　द) षड्विधा

ix) मेघः समवायो विद्यते – [1]

अ) घूमस्य　　ब) घूमज्योतिः सलिलमरूताम्

स) जलस्य　　द) मरूताम्

x) अलकापुराधीशः अस्ति – [1]

अ) यक्षः　　ब) कुबेरः

स) मेघः　　द) कालिदासः

xi) मेघेन पथि स्थूलहस्तावलेपाः परिहरणीयः – [1]

अ) दिङ्नागानाम्　　ब) सिद्धमुनीनाम्

स) सिद्धाङ्गनानाम्　　द) राजहंसानाम्

xii) गोपवेषस्य कान्तिमापत्स्यते – [1]

अ) यक्षः　　ब) कुबेरः

स) मेघः　　द) आम्रकूटः

xiii) अध्वश्रमपरिगतं मेघं सानुमान् साधु मूर्ध्ना वक्ष्यति – [1]

अ) रामगिरिः　　ब) आम्रकूटः

स) देवगिरिः　　द) नीचैः

xiv) प्रतिमानाटकस्य रचयिता कोऽस्ति – [1]

अ) कालिदासः　　ब) श्रीहर्षः

स) भवभूतिः　　द) भासः

xv) प्रतिमानाटके अङ्काः सन्ति – [1]

अ) सप्त　　ब) षट्

स) पञ्च　　द) नव

xvi) कैकेयी पुत्रभरतस्य कृते किमिच्छति? [1]

अ) चतुर्दशवर्षाणां वनगमनम्　　ब) राजभवनम्

स) राज्याभिषेकम्　　द) मातुलगृहगमनम्

xvii) सुमन्त्रः कः आसीत्? [1]

अ) सेवकः　　ब) अमात्यः

स) ब्रह्मचारी　　द) राजा

xviii) भरतः रामेण सह मेलितुं कुत्र गतवान्? [1]

अ) दण्डकारण्यम्　　ब) नैमिषारण्यम्

स) त्रिकूटपर्वतम्　　द) सुमेरूपर्वतम्

**2)** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) प्रस्तुताप्रस्तुतानां च ..................। **[1]**

ii) हासस्थायी रसो ................। **[1]**

iii) द्वौ विवक्षित वाच्यस्य .....................। **[1]**

iv) लक्ष्यलक्षकवैशिष्ट्याद् ...................। **[1]**

v) मन्दं मन्दं नुदति ..................। **[1]**

vi) आरब्धे पटहे स्थिते ..................। **[1]**

**3)** अतिलघूत्तरात्मकप्रश्ना: – **[12×1=12]**

i) दृष्टान्तालङ्कारं निरूपयत। **[1]**

ii) श्रृंगाररसस्य स्थायिभाव: क:? **[1]**

iii) वैदर्भी रीति: कुत्र भवति? **[1]**

iv) असंलक्ष्यक्रमव्यङ्ग्यध्वनौ केषामन्तर्भावो भवति? **[1]**

v) अभिधया कोऽर्थो अभिधीयते? **[1]**

vi) निर्देश शब्द: कस्य आयतनं नास्ति? **[1]**

vii) यक्ष: कुत्र वसतिं चक्रे? **[1]**

viii) अद्रे: श्रृंगं क: हरति? **[1]**

ix) विरहावस्थाया: का नाम सिन्धु: वेणीभूतप्रतनुसलिला जाता? **[1]**

x) महाराजदशरथस्य कति राज्य: आसन्? **[1]**

xi) प्रतिमागृहे केषां प्रतिमा: स्थापिता: आसन्? **[1]**

xii) रावणस्य कथनानुसारं काञ्चनमृग: कुत्र निवसति स्म? **[1]**

**<u>खण्डः – ''ब''</u>**

लघूत्तरात्मकप्रश्नाः [10×2=20]

4) ''वाक्यार्थयोः सदृशयोरैक्यारोपो'' इत्यत्र कोऽलंकारः? तल्लक्षणं लेखनीयम्। [2]

5) अर्थान्तरन्यासालङ्कारस्य लक्षणं विलिख्य उदाहरणमपि लिखत। [2]

6) स्वभावोक्त्यलङ्कारस्य लक्षणं सोदाहरणं लिखत। [2]

7) करूणरसस्य लक्षणं लिखत। [2]

8) गुणीभूतव्यङ्ग्यस्य त्रैविध्यस्य निरूपणं कुरूत। [2]

9) तुल्यप्राधान्यनामकं गुणीभूतव्यङ्ग्यस्य अभिप्रायं लिखत। [2]

10) मेघं दृष्ट्वा यक्षः किं चिन्तयात्रास? [2]

11) विन्ध्यपादे का विशीर्णा वर्तते? [2]

12) महाकविभासस्य नाटकानां नामानि लेखनीयानि। [2]

13) ''मेरूश्चलन्निव युगक्षयसन्निकर्षे'' इत्यत्र छन्दः परिचीय तल्लक्षणमपि लिखत। [2]

## खण्डः – ''स''

दीर्घोत्तरीयाः प्रश्नाः – [4×3=12]

**14)** अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः सप्रसंग व्याख्या करणीया। [1+2=3]

अ) आलम्बनोद्दीपनामा विभावः कारणं द्विधा।
कार्योऽनुभावो भावश्च सहायो व्यभिचार्यपि।।

ब) निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभाव भूः।
क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः।।

**15)** अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। [3]

अ) मुख्यार्थस्याविवक्षायां पूर्वाऽर्वाची च रूढितः।
प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता।।

ब) शब्दे पदार्थे वाक्यार्थे संख्यायां कारके तथा।
लिङ्गे चेयमलङ्काराङ्कुरबीजतया स्थिता।।

**16)** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंग भावार्थो लेखनीयः। [1+2=3]

अ) जातंवंशे भुवनविदिते पुष्कराऽवर्तकानां,
जानामि त्वां प्रकृतिपुरूषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहम्,
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

ब) पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै –
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः।
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः।।

**17)** महाकविभासप्रणीतस्य प्रतिमानाटकस्य तृतीयाङ्कस्य कथासारं लिखत। [3]

अथवा

सीतायाः चरित्रचित्रणं लिखत।

## <u>खण्ड: – ''द''</u>

निबन्धात्मकप्रश्ना: – [3×4=12]

**18)** अधोलिखितयो: कारिकयो: एकस्या: कारिकाया: सप्रसंग व्याख्या करणीया। **[1+3=4]**

अ) सामुख्यं विदधानाया: स्फुटमर्थान्तरे गिर:।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मक:।।

ब) नानाप्रभेदानियता: क्वचित् प्रकरणादिना।
अर्थेऽर्थमन्यं यं वक्ति तद्वाच्यव्यङ्ग्यमिष्यते।।

**19)** अधोलिखितयो: श्लोकयो: कस्यचिदेकस्य सप्रसंग–व्याख्या करणीया। **[1+3=4]**

अ) कश्चित् कान्ताविरहगुरूणा स्वाधिकारात्प्रमत्त:
शापेनाऽस्तङ्गमितमहिमा वर्ष भोग्येण भर्तु:।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरूषु वसतिं रामगिर्याश्रमेषु।।

ब) वक्र: पन्था यदपि भवत: प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरूज्जयिन्या:।
विद्युद्यामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

**20)** अधोलिखितयो: श्लोकयो: कस्यचिदेकस्य सप्रसंग व्याख्या करणीया – **[1+3=4]**

अ) अनुचरति शशांकं राहुदोषेऽपि तारा
पतति च वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणु: पंकलग्नं गजेन्द्र:
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्य:।।

ब) मेरूश्लन्निव युगक्षयसन्निकर्षे
शोषं व्रजन्निव महोदधिरप्रमेय:।
सूर्य: पतन्निव च मण्डलमात्र लक्ष्य:
शोकाद् भृशं शिथिलदेहमतिर्नरेन्द्र:।।

☯☯☯☯

DO NOT WRITE ANYTHING HERE